मविद्याकामकर्मविनिर्मुक्तमेव तद्रूपम्। यत्सुषुप्त आत्मनो गृह्यते प्रत्यक्षत इति तदेतद्यथाभूतमेवाभिहितं सर्वसम्बन्धाधीनमेतद्रूपमिति। तस्मादत्रैतस्मिन् सुषुप्तस्थानेऽतिच्छन्दापहतपाप्माभयमेतद्रूपं तस्मादत्र पिता जनकः तस्य च जनयितृत्वाद्यत्पितृत्वं पुत्रं प्रति तत्कर्मनिमित्तं तेन च कर्मणाऽयमसम्बद्धोऽस्मिन् काले, तस्मात्पिता पुत्रसम्बन्धनिमित्तस्य कर्मणो विनिर्मुक्तत्वात् पिताप्यपिता भवति। तथा पुत्रोऽपि पितुरपुत्रो भवतीति सामर्थ्याद्गम्यते उभयोर्हि सम्बन्धनिमित्तं कर्म। तदयमतिक्रान्तो वर्त्ततेऽपहतपाप्मेति ह्युक्तम्। तथा माताऽमाता। लोकाः कर्मणा जेतव्या जिताश्च तत्कर्मसम्बन्धाभावाल्लोका अलोकाः। तथा देवाः कर्माङ्गभूतास्तत्कर्मसम्बन्धात्ययाद्देवादेवाः। तथा वेदाः साध्यसाधनसम्बन्धविधायकाः ब्राह्मणलक्षणा मन्त्रलक्षणाश्चाभिधायकत्वेन कर्माङ्गभूता अधीता अध्येतव्याश्च कर्मनिमित्तमेव सम्बध्यन्ते पुरुषेण। तत्कर्मातिक्रमणादेतस्मिन् काले वेदा अप्यवेदाः सम्पद्यन्ते। न केवलं शुभकर्मसम्बन्धातीतः। किन्तर्हि अशुभैरप्यत्यन्तघोरैः कर्मभिरसम्बद्ध एवायं वर्त्तत इत्येतमर्थमाह अत्र स्तेनो ब्राह्मणसुवर्णहर्त्ता भ्रूणहासहपाठादवगम्यते। स तेन घोरेण कर्म्मणैतस्मिन् काले विनिर्मुक्तो भवति। येनायं कर्मणा महापातकी स्तेन उच्यते तथा भ्रूणहाऽभ्रूणहा तथा चाण्डालो न केवलं प्रत्युत्पन्नेनैव कर्मणा विनिर्मुक्तः। किं तर्हि सहजेनाप्यत्यन्तनिकृष्टजातिप्रापकेणापि विनिर्मुक्त एवायम्। चण्डालो नाम शूद्रेण ब्राह्मण्यामुत्पन्नः चण्डाल एव चाण्डालः स जातिनिमित्तेन कर्मणाऽसम्बद्धत्वादचाण्डालो भवति। पौल्कसः पुल्कस एव पौल्कसः शूद्रेणैव क्षत्रियायामुत्पन्नः। तथा सोऽप्यपौल्कसो भवति। तथा शुभलक्षणैश्च कर्मभिरसम्बद्धो भवतीत्युच्यते। श्रमणः परिव्राट् यत्कर्मनिमित्तो भवति स तेन विनिर्मुक्तत्वादश्रमणः। तथा तापसो वानप्रस्थोऽतापसः। सर्व्वेषां वर्णाश्रमादीनामुपलक्षणार्थमुभयोर्ग्रहणं किं बहुना। अनन्वागतं न अन्वागतमनन्वागतमसम्बद्धमित्येतत् पुण्येन शास्त्रविहितेन कर्म्मणा। तथा पापेन विहिताकरणप्रतिषिद्धक्रियालक्षणेन रूपपरत्वान्नपुंसकलिङ्गम्। अभयं रूपमिति ह्यनुवर्त्तते। किं पुनरसम्बद्धत्वे कारणमिति तद्धेतुरुच्यते। तीर्णोऽतिक्रान्तो हि यस्मादेवंरूपस्तदा तस्मिन् काले सर्वाञ्छोकान् शोकाः कामा इष्टविषयप्रार्थनाः ते हि तद्विषयवियोगे शोकत्वमापद्यन्ते। इष्टं हि विषयमप्राप्तं वियुक्तं चोद्दिश्य चिन्तयानस्तद्गुणान् सन्तप्यते पुरुषोऽतः शोको रतिः काम इति पर्य्यायाः। यस्मात् सर्वकामातीतो ह्यत्रायं भवति। न कञ्चन कामं कामयते अतिच्छन्दा इति ह्युक्तं तत्प्रक्रियापतितोऽयं शोकशब्दः कामवचन एव भवितुमर्हति। कामश्च कर्महेतुर्वक्ष्यति हि। "स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुत" इति अतः सर्वकामातितीर्णत्वाद्युक्तमुक्तमनन्वागतं पुण्येनेत्यादि। हृदयस्य हृदयमिति पुण्डरीकाकारो मांसपिण्डस्तत्स्थमन्तःकरणं बुद्धिर्हृदयमित्युच्यते तात्स्थ्यान्मञ्चाक्रोशनवत्। हृदयस्य बुद्धेर्ये शोका बुद्धिसंश्रया हि ते। "कामः संकल्पो विचिकित्सेत्यादि" "सर्वं मन एव" इत्युक्तत्वात् वक्ष्यति च "कामा येऽस्य हृदि श्रिताः" आत्मसंश्रयभ्रान्त्यपनोदाय हीदं वचनम्। "हृदि श्रिता हृदयकोशा" इति च। हृदयकारणसम्बन्धातीतश्चायमस्मिन् कालेऽतिक्रामति मृत्योरूपाणीति ह्युक्तम्। हृदयसम्बन्धातीतत्वात्तत्संश्रयकामसम्बन्धातीतो भवतीति युक्ततरं वचनम्। ये तु वादिनः हृदि श्रिताः कामा वासनाश्च हृदयसम्बन्धिनमात्मानमुपसर्प्योपश्लिष्यन्ते। हृदयवियोगेऽपि चात्मन्यवतिष्ठन्ते पुटतैलस्थइव पुष्पादिगन्ध, इत्याचक्षते। तेषां "कामः संकल्पः" "हृदये ह्येव रूपाणि" हृदयस्य शोका "इत्यादीनां वचनानामानर्थक्यमेव। हृदयकरणोत्पाद्यत्वादिति चेत् न हृदि श्रिता इति विशेषणात्। न हि हृदयस्य करणमात्रत्वे हृदि श्रिता इति वचनं समञ्जसम्। हृदये ह्येव रूपाणि प्रतिष्ठितानीति च। आत्मविशुद्धेश्च विवक्षितत्वाद्धृच्छ्रयणवचनं यथार्थमेव युक्तम्। "ध्यायतीव लेलायतीवेति च" श्रुतेरन्यार्थासम्भवात्। "कामा येऽस्य हृदि श्रिता" इति विशेषणादात्माश्रया अपि सन्तीति चेत् न अनाश्रितापेक्षत्वात् न चाश्रयान्तरमपेक्ष्यते हृदीति विशेषणं किन्तर्हि? ये हृद्यनाश्रिताः कामास्तानपेक्ष्य विशेषणम्। ये त्वप्ररूढा भविष्या भूताः स्वप्रतिपक्षतो निवृत्तास्ते नैव हृदि श्रिताः, सम्भावन्ते च ते। अतो युक्तं तानपेक्ष्य विशेषणम्। ये प्ररूढा वर्त्तमानादिविषये ते सर्वे प्रमुच्यन्ते इति। तथापि विशेषणानर्थक्यमिचि चेत् न तेषु यत्नाधिक्याद्धेयार्थत्वात्। इतरथाऽश्रुतमनिष्टञ्च कल्पितं स्यादात्माश्रयत्वञ्च कामानाम्। "न कञ्चन कामं कामयत" इति